न सेडिति कृतेऽकित्वे निष्ठायामवधारणात् ।
ज्ञापकान्न [1]परोक्षायां सनि झल्ग्रहणं विदुः ॥
[2]इत्वं कित्संनियोगेन रेण तुल्यं सुधीवनि ।
वस्वर्थं [3]किदतीदेशान्नि[4]गृहीतिः प्रयोजनम् ॥ (म. भा. १.२००)

## निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः । (१९/३०५२)

न सेट् [5]इति वर्तते । शीङ स्विदि मिदि क्ष्विदि [6]धृष् इत्येतेभ्यः परो निष्ठाप्रत्ययः सेण् न किद् भवति । शयितः, शयितवान् । [7]प्रस्वेदितः, प्रस्वेदितवान् । प्रमेदितः, प्रमेदितवान् । [8]प्रक्ष्वेदितः, प्रक्ष्वेदितवान् । प्रधर्षितः प्रधर्षितवान् । सेट् [9]इत्येव । स्विन्नः, स्विन्नवान् । स्विदादीनाम् 'आदितश्च' (७.२.१६/३०३६) इति निष्ठायामिट् प्रतिषिध्यते । 'विभाषा भावादिकर्मणोः' (७.२.१७/३०५४) इति [10]पक्षेऽभ्यनुज्ञायते स विषयः कित्वप्रतिषेधस्य ॥[11]

## मृषस्तितिक्षायाम् । (२०/३०५९)

मृषे[12]र्धातोः तितिक्षायामर्थे [13]निष्ठा सेण् न किद् भवति । तितिक्षा [14]क्षमा । [15]मर्षितः, मर्षितवान् ॥ [16]तितिक्षायाम् इति किम् ? [17]अपमृषितं वाक्यमाह ॥

## उदुपधाद्भावादिकर्मणोरन्यतरस्याम् । (२१/३०५६)

निष्ठा सेण् न कित् इति वर्तते । [18]उदुपधाद् धातोः [19]परो भावे आदिकर्मणि च वर्तमानो निष्ठाप्रत्ययः [20]सेडन्यतरस्यां न किद् भवति । द्युतितमनेन, द्योतितमनेन । प्रद्युतितः, प्रद्योतितः । [21]मुदितमनेन, [22]मोदितमनेन । प्रमुदितः, प्रमोदितः । उदुपधात् [23]इति किम्? [24]लिखितमनेन । भावादिकर्मणोः [25]इति किम्? रुचितं कार्षापणं [26]ददाति । सेट् [27]इत्येव । [28]प्रभुक्त ओदनः । व्यवस्थितविभाषा चेयम् । तेन शब्-विकरणानामेव भवति । 'गुध परिवेष्टने' (धा. पा. ११२०), [29]गुधितम् इत्यत्र न भवति ॥

## पूङः क्त्वा च । (२२/३०५१)

अन्यतरस्याम् इति न [30]स्वर्यते । उत्तरसूत्रे [31]पुनर्वावचनात् । [32]न सेट् इति वर्तते । [33]पूङश्च इड् विहितः 'क्लिशः क्त्वानिष्ठयोः' (७.२.५०/३०४९), 'पूङश्च' (७.२.५१/३०५०) इति । पूङः [34]परो निष्ठाप्रत्ययः क्त्वा च सेण् न किद् भवति । पवितः, पवितवान् । क्त्वाप्रत्ययस्य 'न क्त्वा सेट्' (१.२.१८/३३२२) इति सिद्ध एव प्रतिषेधः । [35]तस्य ग्रहणमुत्तरार्थम् । तथा चोक्तं 'नित्यमकित्वमिडाद्योः [36]क्त्वानिष्ठयोः क्त्वाग्रहणमुत्तरार्थम्' इति (म. भा. १. २०१) ॥

---

1. परोक्षाणां ब. 2. उत्त्वं ह. 3. किदतिदेशात् ह. 4. क्त्वा च विग्रहात् ग. 5. किदिति अनुवर्तते ब.क.ड.ह. 6. धृष्ट ब. 7. प्रस्वेदितम् ग. 8. उदाहरणमिदं नास्ति ग. 9. इति किम् ह. 10. पक्षे इट् ग. 11. शीङोऽनुबन्धनिर्देशो यङ्लुङ्निवृत्त्यर्थः । तेन शेश्यितः, शेश्यितवान् इति इत्यधिकम् ड. 12. धातोः नास्ति फ. 13. अर्थवन्निष्ठाभावात् परः फ, वर्तमानात् ग. ह. 14. क्षान्तिः अ. क. फ. ह. ग. 15. मर्षिता ग. 16. तितिक्षायाम्–आह नास्ति ह. 17. अपमृपि न वाक्यम् ब. 18. उकारोपधात् ग. 19. परो नास्ति फ. 20. सेण् न किद् भवत्यन्यतरस्याम् अ.क. 21. प्रमुदितम् फ. 22. नोदितमनेन ब. 23. इति नास्ति ह. 24. विदितमेनेन अ. फ, प्रलिखितः ह, प्रतिलिखितं ग. 25. इत्येव क. 26. ददाति नास्ति ड. फ., रुचिताः कार्षापणाः ह. 27. इति फ. 28. भुक्तमनेन । प्रभुक्त ओदनः ह. ग. 29. निगुधितम् क. ड. अ. 30. स्मर्यते क. ह, निवार्यते ग. 31. पुनर्वचनात् ग, वाग्रहणात् ह. 32. न नास्ति ह. 33. पूङश्चेतीड् ड. 34. परः क्त्वाप्रत्ययः निष्ठा च क. ड. फ, निष्ठाप्रत्ययः अ. 35. तस्य नास्ति फ. ग. ह. 36. क्त्वानिष्ठयोः नास्ति ब.क.ड.ग.ह.